# Shivastutih

# शिवस्तुतिः

## Document Information

Text title : shivastutiH 16 from pArameshvaratantra

File name : shivastutiHpArameshvaratantre.itx

Category : shiva

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : 6th paTala of Parameshvaragama Verses 77 to 108

Latest update : July 6, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 7, 2022

*sanskritdocuments.org*

# शिवस्तुतिः

(पारमेश्वरागमान्तर्गते)
नमः शिवाय रुद्राय नम ओङ्काररूपिणे ।
भक्तस्थलस्वरूपाय शिवलिङ्गाय ते नमः ॥ १॥

गजचर्माम्बरभृते व्याघ्रचर्मधराय ते ।
महेशस्थलरूपाय शिवलिङ्गाय ते नमः ॥ २॥

कपर्दिने सकलाय ककुद्मिध्वजशोभिने ।
प्रसादस्थलरूपाय शिवलिङ्गाय ते नमः ॥ ३॥

नमः परमात्मने तुभ्यं प्राणलिङ्गस्थलात्मने ।
शुद्धस्फटिकवर्णाय शिवलिङ्गाय ते नमः ॥ ४॥

नीलकण्ठाय नित्याय निर्मलाय परात्मने ।
शरणस्थलरूपाय शिवलिङ्गाय ते नमः ॥ ५॥

त्रिशूलमृगहस्ताय कुठारभयपाणये ।
शिवलिङ्गैकरूपाय शिवलिङ्गाय ते नमः ॥ ६॥

नमो दक्षमखान्ताय नमोऽन्धकविघातिने ।
नमः सर्वज्ञरूपाय शिवलिङ्गाय ते नमः ॥ ७॥

पार्वतीशाय पृथवे पराय परमेष्ठिने ।
नमस्ते नित्यतृप्ताय शिवलिङ्गाय ते नमः ॥ ८॥

नमस्ते वेदरूपाय नमः कन्थानिषङ्गिणे ।
नमस्त्वनादिबोधाय शिवलिङ्गाय ते नमः ॥ ९॥

नाटिताखिलभूताय नगजार्धशरीरिणे ।
नमः स्वतन्त्रतन्त्राय शिवलिङ्गाय ते नमः ॥ १०॥

नमः शशाङ्कचूडाय शशाङ्कायुतरोचिषे ।

अलुप्तशक्तये नित्यं शिवलिङ्गाय ते नमः ॥ ११॥

नमः कैलासवासाय नमस्ते पुरघातिने ।
नमोऽस्त्वनन्तशक्ताय शिवलिङ्गाय ते नमः ॥ १२॥

निःश्वासोत्पन्नवेदाय साश्वी(क्षि)भूतत्रयीमते । (श्वाश्वी)
नमस्ते भक्तिरूपाय शिवलिङ्गाय ते नमः ॥ १३॥

कमलोद्भववन्द्याय कपर्दिन् जटिने नमः ।
कर्मक्षयात्मने तुभ्यं शिवलिङ्गाय ते नमः ॥ १४॥

नमो गणेशपुत्राय नमस्ते स्कन्दसूनवे ।
नमो बुद्धिस्वरूपाय शिवलिङ्गाय ते नमः ॥ १५॥

गङ्गाधराय गोभर्त्रे गौरीवक्त्रावलोकिने ।
नमो विचाररूपाय शिवलिङ्गाय ते नमः ॥ १६॥

विश्वेश्वराय विश्वाय विश्वरूपाय वेधसे ।
दर्पक्षयस्वरूपाय शिवलिङ्गाय ते नमः ॥ १७॥

सर्वसधाराय सर्वाय सर्वोत्पत्तिलयात्मने ।
सम्यग्ज्ञानस्वरूपाय शिवलिङ्गाय ते नमः ॥ १८॥

मृत्युञ्जयाय रुद्राय त्र्यम्बकाय त्रिमूर्तये ।
महावीर्याय वीराय शिवलिङ्गाय ते नमः ॥ १९॥

वेदवेदान्तवेद्याय वेदार्थाय विवेकिने ।
महसे यशसे तुभ्यं शिवलिङ्गाय ते नमः ॥ २०॥

सोमसूर्याग्निनेत्राय नमस्ते त्वष्टमूर्तये ।
नमो महाश्रीरूपाय शिवलिङ्गाय ते नमः ॥ २१॥

निराकाराय कवये कारणाय कलात्मने ।
नित्यज्ञानस्वरूपाय शिवलिङ्गाय ते नमः ॥ २२॥

सूर्यकोटिप्रकाशाय सूक्ष्माय सुखरूपिणे ।
शुद्धवैराग्यरूपाय शिवलिङ्गाय ते नमः ॥ २३॥

नमः षड्भाग्यरूपाय नमः षड्भाग्यदायिने ।
मुक्तये मुक्तिसन्धात्रे शिवलिङ्गाय ते नमः ॥ २४॥

अतीतत्र्यष्टतत्त्वाय त्र्यष्टतत्त्वस्वरूपिणे ।
पञ्चविंशात्मतत्त्वाय शिवलिङ्गाय ते नमः ॥ २५॥

वरदमृगकुठाराभीतिहस्ताम्बुजाय
स्फुटमुकुटविराजच्चन्द्रमःशेखराय ।
मृदुलविमलदूर्वाश्लिष्टभुभृत्सुताय
प्रणवमय नमः श्रीशङ्करायों नमस्ते ॥ २६॥

फलश्रुतिः -
इति स्तुवीत यो भक्त्या त्रिसन्ध्यं प्रत्यहं शिवे ।
तद्दृष्टिगोचराः सर्वे शिवा एव न संशयः ॥ २७॥

एतद्विजानतो देवि नान्यदस्ति ततः परम् ।
ज्ञातव्यं परतत्त्वाख्यं सोऽहमेव न संशयः ॥ २८॥

अनेन स्तवराजेन भावयेन्मामधीश्वरम् ।
देहान्ते सर्वमाप्नोति मम सायुज्यमव्ययम् ॥ २९॥

विचारयेदेतदर्थं सम्यग् गुरुमुखाच्छिवे ।
न स भूयो निपतति संसारे दुःखसागरे ॥ ३०॥

परित्यज्यापि सर्वस्वं सर्वयत्नेन सर्वदा ।
सर्वदा वर्तयेदेतद् यदीच्छेत् सुखमात्मनः ॥ ३१॥

॥ इति श्रीपारमेश्वरागमान्तर्गते शिवस्तुतिः सम्पूर्णा ॥

6th paTala of Parameshvaragama/Parameshvaratantra Verses 77 to 108
Encoded and proofread by Ruma Dewan

*Shivastutih*
pdf was typeset on July 7, 2022

Please send corrections to *sanskrit@cheerful.com*